भक्तायनेषु हृदि चावतते प्रगाढ़ं।
नान्ने रुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह पञ्चविधं वदन्ति" ॥

इति सुश्रुतः। अलङ्कारशास्त्रोक्तदशविधस्मरदशामध्ये परिगणितो वस्तुवैराग्यरूपः स्मरदशाविशेषः, यथा साहित्यदर्पणे,—

"अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः।
अरुचिर्वस्तुवैराग्यं सर्व्वत्रारागिता धृतिः" ॥

अरुजः, पुं, (रुजति, रुज्+क, नञ्समासः।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥ सोंदालि इति भाषा। (स्वनामख्यातदानवविशेषः।
"प्रक्रादोऽश्वशिराः कुम्भः संक्रादो गगनप्रियः।
अनुक्रादो हरिहरौ वराहः संहरोऽरुजः" ॥
इति हरिवंशे।)

अरुणं, क्ली, (ऋ+उनन्।) कुङ्कुमं। सिन्दूरं। इति राजनिर्घण्टः॥

अरुणः, पुं, (ऋ+उनन्।) सूर्य्यसारथिः। स तु विनतापुत्रः गरुड़ज्येष्ठभ्राता च। तत्पर्य्यायः। सूरसूतः २ अनूरुः ३ काश्यपिः ४ गरुड़ाग्रजः ५ सूर्य्यः। अर्कवृक्षः। अव्यक्तरागः। ईषद्रक्तवर्णः। इत्यमरः। सन्ध्यारागः। शब्दरहितः। कपिलवर्णः। कुष्ठभेदः। अरुणगुणविशिष्टे तु वाच्यलिङ्गः। इति मेदिनी॥ पुन्नागवृक्षः। गुड़ः। इति राजनिर्घण्टः॥ (कपिलवर्णयुक्तः। कृष्णमिश्रितरक्तवर्णविशिष्टः।
"कपोताङ्गारुणो धूमो दृश्यते विमलाम्बरे"।
इति रामायणे।)

अरुणकमलं, क्ली, (कृष्णसर्पइत्यादिवत् नित्यकर्म्मधारयः।) रक्तोत्पलं। इति राजनिर्घण्टः॥

अरुणलोचनः, पुं, (अरुणे रक्ते लोचने यस्य सः।) पारावतः। इति राजनिर्घण्टः॥

अरुणसारथिः, पुं, (अरुणः गरुड़ाग्रजः सारथिर्यस्य सः।) सूर्य्यः। इति हेमचन्द्रः॥

अरुणा, स्त्री, (अरुण+स्त्रियां टाप्।) अतिविषा। श्यामा। मञ्जिष्ठा। त्रिवृता। इति मेदिनी॥ इन्द्रवारुणी। गुञ्जा। इति राजनिर्घण्टः॥ मुण्डितिका। इति रत्नमाला॥

अरुणात्मजः, पुं, (अरुणस्य आत्मजः, षष्ठीतत्पुरुषः।) जटायुपक्षी। इति त्रिकाण्डशेषः॥

अरुणावरजः, पुं, (अरुणस्य अवरजः षष्ठीतत्पुरुषः।) गरुड़ः। इति हेमचन्द्रः॥
("अरुणावरजं श्रीमानारुरोह रणे हरिः।
सुवर्णं स्वेन वपुषा सुपर्णं खेचरोत्तमम्" ॥
इति हरिवंशे।)

अरुणोदयः, पुं, (अरुणस्य बालादित्यस्य उदयो यत्र सः।) सूर्य्योदयात् पूर्व्वं मुहूर्त्तद्वयकालः। यथा,—
"चतस्रो घटिकाः प्रातररुणोदय उच्यते।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः" ॥
इति ब्रह्मवैवर्त्तपुराणं॥ (यदुक्तं,—
"रजनीशेषयामस्य शेषार्द्धमरुणोदयः"। इति।
"नृन् प्रशंसत्यजस्रं यो घण्टाताड़ोऽरुणोदये"।
इति मनुः।)

अरुणोदयसप्तमी, स्त्री, (अरुणोदयकाले पुण्यविशेषजनिका या सप्तमी।) माघशुक्लसप्तमी। माकरी सप्तमी। यथा। भविष्ये।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी।
अरुणोदयवेलायां तस्यां स्नानं महाफलं॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" ॥
कोटिभास्करा कोटिसप्तमीतुल्या। सूर्य्यग्रहणफलं स्नानजं सन्निहिते बुद्धिरन्तरङ्गा इति न्यायात्। तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयं। अत्र बहुशतसूर्य्यग्रहणानां प्रत्येकाधिकरणतासंसर्गेणान्वयात् कालानां स्नानानां तत्फलानामपि बहुशतत्वं लभ्यते। अतो नाप्रसिद्धिः॥ * ॥ पूर्णसप्तम्यां पूर्व्वापरयोर्यत्रारुणोदयकाले सप्तमी तत्र पूर्व्वदिने तत्काले स्नानं।
"चतस्रो घटिकाः प्रातररुणोदय उच्यते।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः॥
त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयं।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ॥
इति कालमाधवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्कालस्य पूर्णतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्गत्वेन इतरस्य चेतराङ्गत्वेनाभिधानात्। अतएव दक्षेण तत्कालमारभ्याह्निककृत्यमभिहितं॥ * ॥ अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव स्नानं।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत्।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" ॥
इति विष्णुधर्म्मोत्तरात्। अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधादिति वक्ष्यते। ब्रह्मवैवर्त्तवचने घटिका दण्डरूपा। परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येकवाक्यत्वात्॥ * ॥ ये तु सूर्य्योदयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्यगुणफलविधिर्लाघवादित्याहुस्तच्चिन्त्यं। प्रकरणान्यत्वे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण प्रकरणभेदे गुणविध्यसिद्धेः। अतएव कल्पतरुरत्नाकरयोः।
"य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ" ॥
इति। विष्णुस्मृतौ। "यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः"। इति नित्यस्नानप्रकरणात् प्रकरणान्तराम्नानात् प्रकरणान्तराधिकरणन्यायेन काम्यस्नानान्तरमिदमप्युक्तं। न तु गुणफलविधिः। किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धिरिति॥ * ॥ अत्र माघमासनिमित्तकमाघसप्तमीनिमित्तककाम्यस्नानयोः प्रातर्विधानात् नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानं। "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया"॥ इति कात्यायनवचनात्।
"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये" ॥
इति मनुवचनेनैकदाजस्रस्नाननिषेधात्।
"धर्म्मविन्नाचरेत् स्नानमाह्निकञ्च पुनः पुनः" ॥
इति मनुवचनाच्च। अतएव नान्दीमुखप्रकरणशेषे प्रधानानामपि काम्यानां तत्तद्देशकालविहितानां तन्त्रेणैव सिद्धिरिति श्राद्धचिन्तामणिः॥ निष्कामविष्णुप्रीतिकामयोः सुतरां सकृदनुष्ठानं। गुणतारतम्यात् फलतारतम्यं इति न्यायेन फलं बोध्यं। तत्तु इक्षुक्षीरगुड़ादिमाधुर्य्यभेदवन्निर्द्देष्टुमशक्यं।
"पक्षान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत्" ॥
इति हेमाद्रिधृतादित्यपुराणोक्तवत्। एतद्वचनप्रागर्द्धं कार्त्तिकमलमासाब्दविषयं।
"देशकालाश्रमक्षेत्रद्रव्यदातृमनोगुणाः।
सुकृशस्यापि दानस्य फलातिशयहेतवः" ॥
इति ब्रह्मपुराणोक्तवच्च॥ * ॥ तीर्थभेदे त्वेकदापि नानास्नानं।
"विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः"।
इति ब्रह्मपुराणादिवचनात्। "तीर्थभेदे तन्त्रप्रसङ्गयोरसम्भवाच्च"। अतएव गङ्गावाक्यावलीतीर्थचिन्तामण्योः। यत्तु प्रयागे व्यहस्नाने क्रोड़ीकृतेऽपि माघसप्तमीस्नानादावसाधारणसङ्कल्पेन पुनस्तथैव प्रातःस्नानाचरणं तद्युक्तं तदा सकृत्स्नानस्यैव विहितत्वात्। अन्यथा तत्त्र्यहफलकामनायां तदानन्त्यापत्तेरित्युक्तं॥ * ॥ स्नाने परिपाटीमाह कृत्यकल्पलतायां विष्णुः। सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय।
"यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी" ॥
इत्युच्चार्य्य स्नायादिति शेषः। रोकं छिद्रं। तिथिकृत्यस्य पौर्णमास्यन्तमासाङ्गत्वात् माकरीपदं मकरार्कारब्धचान्द्रमासीयतिथिपरं।
"तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दिशेत्" ॥
इति ब्रह्मपुराणान्मन्वन्तरादित्वेन तथा युक्तत्वाच्च। यथा मत्स्यपुराणे।
"यस्मान्मन्वन्तरादौ तु रथमापुर्द्दिवाकराः।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी॥
अरुणोदयवेलायां तस्यां स्नानं महाफलं"।
अतएव नारसिंहे रथाख्यायामित्युक्तं। यथा,—
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः॥
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्ज्जयेत्"।
द्वादश्यां शयनोत्थानद्वादश्यां। भरण्यां शक्रध्वजपातभरण्यामिति कल्पतरुः॥ अत्र महानवम्यादिसाहचर्य्याच्चान्द्रत्वं प्रतीयते। अतएव चतुर्द्दशमन्वन्तरादिगणने क्वापि न राशुल्लेखः। यथा। भविष्यमत्स्ययोः।
"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी॥